# कनकधारा स्तोत्रम्

**अधैं हरेः पुलकभूषणमाश्रयन्ती भृनेव मुकुलाभरणं तमालम्।।**
**अघीकृताखिलविभूतिरपार्षैलीला मांगल्यदाऽस्तु मम मचॅलदेवतायाः ||1||**

मुग्धा मुहुर्विदधती वदने मुरारेः प्रेमत्रपाप्रणिहितानि गतागतानि। माला
दृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसम्भवायाः ।।2||

विश्वामरेन्द्रपदविभ्रमदानदक्षमानन्दहेतुरधिकं मुरविद्विषोऽपि।

ईषन्निषीदतु मयि क्षणमीक्षणार्धमिन्दीवरोदरसहोदरमिन्दिरायाः ।।3 ||

आमीलिताक्षमधिगम्य मुदा मुकुन्दमानन्दकन्दमनिमेषमनर्धैतन्त्रम् ।

आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजधैंशयाचँनायाः || 4 ||

बान्तरे मधुजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति ।

कामप्रदा भगवतोऽपि कटाक्षमाला कल्याणमावहतु मे कमलालयायाः । || 5। ।

कालाम्बुदालिललितोरसि कैटभारेर्धाराधरे स्फुरति या तडिद(नेव ।

मातुः समस्तजगतां महनीयमूर्तिर्भद्राणि मे दिशतु भार्गवनन्दनायाः ।।6 ||

प्राप्तं पदं प्रथमतः किल यत्प्रभावान्मार्धैल्यभाजि मधुमाथिनि मन्मथेन ।
मय्यापतेत्तदिह मन्थरमीक्षणार्धं मन्दालसं च मकरालयकन्यकायाः । ।7||

दद्याद्दयानुपवनो द्रविणाम्बुधारामस्मिन्नकिंचनविह●शिशौ विषण्णे।

दुष्कर्मधर्ममपनीय चिराय दूरं नारायणप्रणयिनीनयनाम्बुवाहः ।।8।।

इष्टा विशिष्टमतयोऽपि यया दयाद्दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते ।
दृष्टिः प्रहृष्टकमलोदरदीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्करविष्टरायाः । ।9 ||

गीर्देवतेति गरुडध्वजसुन्दरीति शाकम्भरीति शशिशेखरवल्लभेति ।
सृष्टिस्थितिप्रलयकेलिषु संस्थितायै तस्यैनमस्त्रिभुवनैकगुरोस्तरुण्यै । |10 | |

श्रुत्यै नमोऽस्तु शुभकर्मफलप्रसूत्यै रत्यै नमोऽस्तु रमणीयगुणार्णवायै ।
शक्त्यै नमोऽस्तु शतपत्रनिकेतनायै पुष्ट्यै नमोऽस्तु
पुरुषोत्तमवल्लभायै।।11||

नमोऽस्तु नालीकनिभाननायै नमोऽस्तु दुग्धोदधिजन्मभूत्यै।

नमोऽस्तु सोमामृतसोदरायै नमोऽस्तु नारायणवल्लभायै । ||12 ||

सम्पत्काराणि सकलेन्द्रियनन्दनानि साम्राज्यदानविभवानि सरोरुहाक्षि।
त्वद्वन्दनानि दुरिताहरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये |13 ||

यत्कटाक्षसमुपासनाविधिः सेवकस्य सकलार्थसम्पदः ।
संतनोति वचनार्थैमानसैस्त्वां मुरारिहृदयेश्वरीं भजे । |14 ||

सरसिजनिलये सरोज हस्ते धवलतमांशु क गन्ध माल्यशोभे ।भगवति
हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् । [15 ||

दिग्घस्तिभिः कनककुम्भमुखावसृष्टस्ववर्वाहिनीविमलचारुजलप्लुताम् ।
प्रातर्नमामि जगतां जननीमशेषलोकाधिनाथगृहिणीममृताब्धिपुत्रीम् ।।16 ||

कमले कमलाक्षवल्लभे त्वं करुणापूरतरर्ङ्गितैरपाचँः ।
अवलोकय मामकिंचनानां प्रथमं पात्रमकृत्रिमं दयायाः । |17 ||

स्तुवन्ति ये स्तुतिभिरमूभिरन्वहं त्रयीमयीं त्रिभुवनमातरं रमाम् ।
गुणाधिका गुरुतभाग्यभागिनो भवन्ति ते भुवि बुधभाविताशयाः | |18 ||

।। इति श्रीकनकधारा लक्ष्मीस्तोत्रम् सम्पूर्णम् ।।

www.astromanu.com

mob no-7983298169